॥ श्री गणेशाय नमः ॥

# अथ श्री शिव पंचोपचार पूजनम्

## ध्यानम्

**(हाथ में अक्षत, पुष्प, वेलपत्र लेकर ध्यान करें)**

**ॐ ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं,**
**रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् ।**
**पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं,**
**विश्वाद्यं विश्ववन्द्यम् निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥**

(ॐ भूर्भुवः स्वः श्री भगवते साम्बसदा शिवाय नमः ध्यानं समर्पयामि)
(शिव जी के चरणों में अक्षत, पुष्प, वेलपत्र चढ़ायें)

## चन्दनम्

**ॐ श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् ।**
**विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम् ॥**

(ॐ भूर्भुवः स्वः श्री भगवते साम्बसदा शिवाय नमः भष्म-चन्दनम् समर्पयामि)
(शिव जी के मस्तक में भष्म एवं चन्दन लगायें)

## पुष्पम्

**ॐ माल्यादीनिसुगन्धीनि मालत्यादीनि वै प्रभो ।**
**मयाहृतानिपुष्पाणि पूजार्थं प्रतिगृह्यताम् ॥**

ॐ भूर्भुवः स्वः श्री भगवते साम्बसदा शिवाय नमः पुष्पम् समर्पयामि
(शिव जी के चरणों में पुष्प चढ़ायें)

## धूपम्

**ॐ वनस्पति रसोद्भूतो गन्धाढ्यो गन्ध उत्तमः ।**
**आघ्रेयः सर्व देवानां धूपोऽयं प्रतिगृह्यताम् ॥**

(ॐ भूर्भुवः स्वः श्री भगवते साम्बसदा शिवाय नमः धूपम् आघ्रापयामि)
(शिव जी को धूप दिखायें)

## दीपम्

**ॐ साज्यं च वर्ति संयुक्तं बह्निना योजितं मया ।**
**दीपं गृहाण देवेश त्रैलोक्यतिमिरा पहम् ॥**

(ॐ भूर्भुवः स्वः श्री भगवते साम्बसदा शिवाय नमः दीपम् दर्शयामि)
(शिव जी को दीप दिखायें)

## नैवेद्यम्

**ॐ शर्कराखण्ड खाद्यानि दधिक्षीरघृतानि च ।**
**आहारंभक्ष्यभोज्यं च नैवेद्यं प्रतिगृह्यताम् ॥**

(ॐ भूर्भुवः स्वः श्री भगवते साम्बसदा शिवाय नमः नैवेद्यम् निवेदयामि)
(एक पात्र में शिव जी के सामने भोग रखें तथा खाली पात्र में तीन बार जल छोड़ें)

## प्रार्थयेत्

**(हाथ में अक्षत, पुष्प, वेलपत्र लेकर प्रार्थना करें)**

**ॐ वन्दे देव उमापतिं सुरगुरुं वन्दे जगत्कारणम् ।**
**वन्दे पन्नगभूषणं मृगधरं, वन्दे पशूनांपतिम् ॥**
**वन्दे सूर्य शशांक वह्निनयनं, वन्दे मुकुन्द प्रियम।**
**वन्दे भक्त जनाश्रयं च वरदं वन्दे शिवं शंकरम्॥**

(ॐ भूर्भुवः स्वः श्री भगवते साम्बसदा शिवाय नमः प्रार्थना पूर्वकं नमस्कारान् समर्पयामि)
(शिव जी के चरणों में अक्षत, पुष्प और वेलपत्र चढ़ायें)

**अनेन पंचोपचार पूजनेन श्रीभगवते साम्बसदाशिव प्रीयतां न मम ॥**

(शिव जी के चरणों में एक आचमनी जल चढ़ायें)

**॥ इति शुभम् भवतु ॥**